काननशतकम्

अर्थात्

चकिया जंगल का वर्णन

विविधयशस्तामरससौरभसमाकृष्ट
समस्तसहृदयमानसमधुकर
निकरनिखिलगुणाकर
प्रचण्डप्रताप

राजाधिराज द्विजराजमहाराजकाशी
नरेश श्री ५ मदीश्वरीप्रसाद ना-
रायणसिंह बहादुर की आ
ज्ञाऽनुसार

श्री पण्डित ताराचरण तर्करत्न ने
रचना किया

बनारस लाइट छापाखाने में छापा गया
सम्वत् १९२५।

श्रीविश्वेश्वरो जयति

—000—

यदनुरागरक्तानां,
स्फुरतिकृतिचमत्कृतिःकृतिनां ।
सजयतिकाशीराजः
श्रीश्वरीप्रसादनारायणोद्विजः ॥

विज्ञापनमिदं । वाराणस्याः पूर्व्वदक्षिण कोणे विन्ध्यगिरेरुपात्यकाया मनादि लिङ्गया गेश्वर नामधेय महादेवाधिष्ठान पूतपदासुचक्रियानामधेयासु चन्द्रप्रभा कर्म्मनाशादि नदी तीर वर्त्तिनीषु विविध सुकुमार लता पल्लवविनिचयमनोहरासु बहुविधविहग कुल कल कल ध्वनिसुरञ्जितासु मृगमयूरादि मनोहर वन्यप्राणि निचय नियत सञ्चारालङ्कृतासु काननभूमीषु मृगयाविहारिणो नन्दने ष्विव पाकशासनान्तरस्य मूर्ति मत इव रस भाव कला कलाप विशेषस्य सतामे कमाश्रयस्य राजाधिराज द्विजराज महारज काशी नरेश श्री

महीश्वरीप्रसाद नारायणसिंहस्य समभिव्याहा
र बिहारिणा बङ्ग देशाधि वासिना भट्ट प-
ल्लीनिवासिना वशिष्ठवंश रत्नाकर विकाशिना
कविता कुमुदिनी कौमुदी प्रकाशिनाद्विजस्रोता
राचरण तर्करत्न न कानन शतकं नाम यदभि
नवं खण्डकाव्यं व्यरचि तदधुना केलि कलाक
लापकोविदसहृदयजननिवहप्रमदसम्बर्द्धनायप्र
काश्यते भवतुताव दिदं यथागुणं परिचित मा
र्य्यं संसदीति ॥

रामनगरराजधानी

श्री काशी राजो
विजयतां

कानन शतकं ।

योगेश्वरस्मरहराश्रितपूतसारे,
सद्गन्धशीकरगधीरसमीरतीरे ।
चन्द्रप्रभाविमलनिर्मलनीलनीरे,
चेतस्त्वरत्वविरतं रतिपत्यगारे ॥ १ ॥

हित्वाचिरप्रणयिनीमनिमेषनेत्रा,

---

(१) अत्र योगेश्वर नामधेय मे कम नादि शिवलिंग वर्त्तते, तस्याश्रमस्य निम्न भागे चन्द्र प्रभानाम्नी परमरमणीयानदीवहति ॥

मागत्यविन्ध्यगिरिकाननमद्यकश्चित् ।
स्पृष्ट्वा समीरमवलोक्यतदीयशोभा,
मुद्भावयत्यखिलमात्मगतस्वभावम् ॥ २ ॥

धन्या मयूरम्रगवानरसारसाद्या,
यस्मादितःकुसुमशायकवासभूमौ ।
अङ्केनिधायदयितःशयितःसुखेन,
हाहावयंतुपिशुनाविफलंभ्रमामः ॥ ३ ॥

आशालतेकिमधुनाफलमाप्तिकामा,
संश्रत्यशीतलमनोहरवन्यभूमिम् ।
जानासिकिन्नवतचेतनहीनचित्ते,
बालावियोगदहनाःसततंज्वलन्ति ॥ ४ ॥

रेपान्यकन्तनकारत्वमितःप्रयाहि,
कान्तारतिश्रमजघर्मबिनाशहेतो ।
नोचेत्समीरम्रगया चरणे चरन्तं,
संघातयामिहरिणंधरणीममुक्त्वा ॥ ५ ॥

---

(५) अनेन समीरणस्य म्रगवाहन त्वात् तन्नाशेतस्य गन्त मसामर्थ्य मिति ध्वनितं ॥

प्राषंडगात्नपरिलाञ्छितपङ्कश्चैत्यं,
स्पृष्ट्वा शरीरमधरीकृतपङ्कजाद्याः ।
दावानलेनसततंसह बर्द्धमानं,
स्पृष्टुंसमीरमिह किंगतमस्यचेतः ॥ ६ ॥
किंचित्तसंप्रतिविहारसुखाभिलाषि
दृष्ट्वास्वभावरमणीयमरण्यमेतत् ।
जानासिकिंनबलवाननिवार्य्य एष,
दीनात्दृगम्बुजनिपातकजन्मवह्निः ॥ ७ ॥
रेदुर्विनीतनयनेनयनेहरिण्या,
दृष्ट्वाविनोदमभिलब्धुमिहप्रयासः ।
हित्वासुधासमसुनिर्मलशीतलापं,
पान्यस्ययात्दृशरतिर्मृगतृष्णिकायाम् ॥ ८ ॥
अस्मात्कुरङ्गिनभयंनहितेबधार्थी,
तिष्ठत्त्वणंभयवतीकिमितःप्रयाहि ।
दृष्ट्वाविलोलनयनेकुटिलेत्वदीये,
शङ्कुदृढंहृदयगंत्वणमुद्धरामि ॥ ९ ॥
रेरेकुरङ्गिकिमुपश्यसिनेचभङ्या

दूरे प्रयाहि न हि ते स्मि सुदर्शनार्हः ।
बालां मदेक हृदयां मुञ्च रीचमाणां,
दग्ध्वा वियोगदहनेन समागतोहम् ॥ १० ॥
नाहो कुरङ्गितवने चमवेच्यमुग्ध,
स्तस्या जगज्जयिदृशः प्रियदास एषः ।
यस्याः कटाक्षपरिनिर्ज्जितने चशोभा,
हित्वा जनालयम हो वनमाश्रितात्वम् ॥ ११ ॥
चन्द्रप्रभे तटिनि चारुपयःप्रकाशै
रूपं प्रदर्शयसि किं जडदेहिनीह ।
नालोकिता बत जगत्प्रियपङ्कजाच्या,
लावण्य जीवननिधेर्हितरङ्गशोभा ॥ १२ ॥
चन्द्रप्रभे न हि पुनस्तव भाग्यवत्त्वम् ।
लोकोत्तरं सलिलपू रमितासि चेत्त्वम् ।
तीच्णनिदाघसमयेन वयौवनाढ्या,
संसर्गसौख्यरहितासि यतश्चिरेण ॥ १३ ॥
कार्कन्धुटन्दमधुरांल्लकलोहितानि,
दृष्ट्वा फलानि किमुदभ्रभरं तनोषि ॥

दूरेस्तुतत्फलमहोनवहेमबल्ल्या,
नोद्दष्टमोष्ठयुगपञ्चमनिन्दितायाः ॥ १४ ॥
रेवल्लिगर्वितमतेकुसुमप्रकाशै,
रूपंप्रदर्शयसिकिंजड़देहिनीह ।
नज्ञायतेसमवलोकिमयारतेषु,
प्रशान्तकुन्दरदनास्मितवक्त्रशोभा ॥ १५ ॥
रेरेनवेकुसुमितेऽद्यप्रसूनबल्लि,
कण्ठावलम्बनकरीप्रियपादपस्य ।
भूमौददासिचरणंनहिगर्वयोगा,
ज्ञानासिकिंनवयौवनमल्पकालम् ॥ १६ ॥
साक्षादनङ्गरमणीमिवहेमवल्लीं,
लावण्यसिन्धुसुधयापरिवर्द्धमानाम् ।
वन्यांलतांकठिनकंटकिकुट्टितागो,
हित्वासमेथदूतईक्षितुमक्षिणीमे ॥ १७ ॥
रेरेमयूरपरिहृत्यवधूंमयूरीं,
दूरेचरप्रणयसागरमज्जदङ्गः ।
नोचेन्मदेकहृदयाविरहाधिजन्म,

दुर्वीर्य्यवह्निशिखयाज्वलितासिसद्य: ॥ १८ ॥

रे रे कलापिकुलचित्रकलापशालि,
शोभांप्रदर्शयसिलोकचयंकिमद्य ।
हाहानवेत्सिनवनीरदनीलवेशा:,
केशा:कुशेशयदृशांकुशलीभवन्ति ॥ १९ ॥

रे कुञ्जमञ्जुलतताकृतचारुशोभ
सौभाग्यमेवगणयामितदात्वदीयम् ।
संचाररञ्जितदिगन्तरमत्तदन्ति,
यानास्थिराम्बुजदृशोयदिपादचार: ॥ २० ॥

कान्तं नियोज्य प्रणयादभिसारिकाया:
सोत्कण्ठमेत्य रहसि प्रियमीक्षयन्त्या: ।
हासप्रभा घनतमो यदि नाशयेत्त्वं
वाच्यस्तदैव सुषमैकपदं निकुञ्ज ॥ २१ ॥

नैतद्विहङ्गरणितं तव कुञ्ज किञ्चित्
शोभाकरं भवति येन तमोऽधिवास: ।
कान्ता समेत्य यदि नाथमुपेत्य किंञ्चित्
सम्भाषयेत्स्मितपुरस्तवसातिशोभा ॥ २२ ॥

गर्वं न तेन वह पादप चित्तमध्ये
छायाप्रदो यदि च तापचयापहन्ता ।
दूरावलोकनपराकृततापवीथ्या
शृङ्गायास्तुनोनिवसतिर्नवहेमवल्ल्याः ॥२३॥

किंरे नवद्धिःशलयम्परिदर्शनीयं
प्रेम्णा तनौ वहसि भूषणबुद्धितोऽग ।
जानीहि भूषणमिदं न पुनः स्वकीयं
कामस्यसर्वजयिनोऽग्निमयःशरोसौ ॥२४॥

नूनामतिर्भवति सम्प्रति मे न्टपस्ते
रे पाप पादप पलाश सुरञ्जितौष्ठः ।
नोचेत् कथम्बत नवीनपलाशशोभां
धृत्वाविराजसिपुनर्नभयंगतोऽसि ॥ २५ ॥

रेरे कुसुम्भ कुसुमोच्चयवर्षणेन
हेमंतनोपि कुसुमेषु समागमेषु ।

---

(२५) पलाशवत् नव पल्लववत सुरञ्जित रमणीयमिति पक्षे पलाशेन मांसभोजने नेति नवीनपलाशशोभां नव पल्लव शोभां पक्षे नवीनानां यूनां पलाशात् मांस भोजनात् शोभां नाम पुष्टिं ॥

वैषं न ते यदिह दाहमुपैष्यसि त्वं
दाहज्ज्वलद्विरहिदेहदहाद्दवाग्नेः ॥ २६ ॥

यस्यैव पुष्पनिचयः पथिकोत्तमाङ्गं
छित्त्वा तदीयरुधिरावलिलोहिताङ्गः ।
जाने न साम्प्रतमहो महतां समाजे
तस्य प्रसूननिचयः किमशोकनामा ॥ २७ ॥

किंवा वियोगदहनैः परिदग्धदेहान्
पान्थान् विनाश्य सविधागमसात्वकेण ।
यस्मात् तदीयनिखिलाधिविनाशहेतुः
किन्तेन पुष्पभवसित्वमशोकनाम ॥ २८ ॥

रेरे विहङ्ग गणरागभराङ्गरागं
गीतं करोषि जनमोहनकारणं किम् ।
मुग्धा वयं न रमणोद्यमवक्रभाव
वालाप्रतीपवचनं श्रुतमेव यस्मात् ॥ २९ ॥

पुण्ये वने स्थितिकरःफलपत्रसेवी

(२७) अशोक पदस्य न भवति शोकोयस्मात् इत्यर्थं माल-
मव्योति ॥

शाखाऽवलम्बनकरो द्विज एव नाम्ना ।
नो सञ्चयी विहग तेन निजद्विजत्वं
सार्थङ्करोषिपथिकाङ्गविकर्तनैः किम् ॥ ३० ॥

उत्तुङ्गश्टङ्ग किमहो परिवर्द्धमानम्
सर्वोन्नतत्वमभिदर्शयसि स्वकीयम् ।
मा गर्वमुद्वह निजं त्वमरण्यवासि
कान्ताकुचौ विलसतोजितहेमश्टङ्गौ ॥ ३१ ॥

शात्त्यास्पदं वर्दति काननमेतदज्ञः
कालस्य सर्वजयिनो रणभूमिमेव ।
नो चेद्विलोक्य सहसा तरुणो बलीयान्
मूर्च्छामुपैति किमहो परिकंपिताङ्गः ॥ ३२ ॥

यस्मिन् लता च भुजगो विटपी कृतान्तः
शीतानिलोऽनलमयः कुसुमं च तीक्ष्णम्

---

(३०) पुण्ये वने स्थितिकरत्वं फल पत्र सेवित्वं द्विजत्वं सञ्चय राहित्यं शाखावलम्बनकरत्वं ब्राह्मणस्य पक्षिणस्वधर्म्मः शाखावेदस्य वृक्षस्यच वर्त्तते त्वं तादृशः सन् निज द्विजत्वं पथिकांगस्य विकर्तनैर्नामखंडनैः किंसार्थं अर्थेन सह वर्तमानं करोषि द्विजस्यदन्त परिचाय कत्वात्त्रचापि स्लेषः ॥

बज्रस्वनोपमविहंगरवः प्रशान्त्यै
केनाश्रितं मुनिभिरेतदहं न जाने ॥ ३३ ॥

नासौ सुहृन्मनसिजस्तव काननांग
प्रच्छन्नशत्रु रतितीच्णतरोऽनिवार्य्यः
अस्यैव बाणदहनस्तवदाहहेतु
र्दावानलो नहि पुनस्तरुघर्षणोत्थः ॥ ३४ ॥

रे तीच्ण कानन परं तव सुंदरत्वम्
श्रुत्वा विलोकयितुमत्र समागतोऽहम्
दूरेऽस्तु ते परमसुन्दरताविलोको
मामां विनाशय कृतान्तरदप्रकाश ॥ ३५ ॥

पान्थस्य कण्ठकलनाद्रुधिराक्तदन्त-
व्याकीर्णदन्तनिचयान् कुसुमच्छलेन ।
पान्थान् विकर्त्तयितुमुग्रतरान् प्रकाश्य
यद्राजसे विपिन किं तदहं न जाने ॥ ३६ ॥

यस्मिन् द्विजाः प्रचपला मधुपानमत्ता
यस्मिन् सदा मृगदृशां भवति प्रचारः ।
यस्मिन् पलाशनिकरः परितः प्रदीप्तः

किन्तद्वनं भवति शान्तिभृतां निवासः ॥ ३७ ॥

रे पञ्चबाण निशितान् निजपञ्चबाणान्

धृत्वा वसंतसचिवो विहगस्वनेन ।

मासं विधेहि जगतां जयशब्दमुच्चै,

र्योगेश्वरः स्मरहरः सविधे प्रदीप्तः ॥ ३८ ॥

दूरं प्रयाहि मदन त्वमितो गृहीत्वा

स्वीयं समस्तमभितापकरं हि वस्तु ।

नोचेत् समेत्य कथयाम्यधुनैव देवं

योगेश्वरं त्रिपुरनाशकरं स्मरारिम् ॥ ३९ ॥

एवं वदन् कृशतनुर्विरहाधिमग्नो

गत्वा पुरान्तकपदं पुनरेव दग्धः ।

तत्रस्थकामपरिवर्द्धनकल्पताद्यै-

रोषाज्जुगुप्सति विशुष्कतरौष्ठभागः ॥ ४० ॥

हे पार्वतीश मदनान्तकरः पुरा त्वम्

(३७) द्विजाः पक्षिणः ब्राह्मण क्षत्रिय वैश्याश्च मधपुष्परसः मद्यञ्च मृगदृशः मृगनेत्राणि सुनयनाः स्त्रियश्च पलाशनिकरः पत्रसमूहः मांसाशिसमूहश्च ॥

कालक्रमाद्भवसि चेन्मदनस्य वश्यः ।
दुर्नीतिदग्धजगतो मदनस्य शान्त्यै,
को वा भवेत्प्रभुरहो त्रिषु विष्टपेषु ॥ ४१ ॥

त्वां वीक्ष्य संप्रति ममेह मतिः स्थिरैषा,
कारागृहे गिरिश बद्धतमः स्मरेण ।
नो चेत् कथं कुसुमबाणधरैः पलाशैः
संवेष्टितोऽसि न बहिर्गमनेसमर्थः ॥ ४२ ॥

कामस्य चान्तकतया मदनान्तकत्वम्
सार्थं करोषि मदनान्तकनाम नाद्य ।
कामोऽन्तको भवति यस्य स एव भूत्वा,
सार्थं करोषि पुनरेव तदात्मनाम ॥ ४३ ॥

मृत्युंजयोऽपि भगवन् विजितः स्मरेण,
जाने ततस्त्रिभुवनस्य जयी मनोजः ।

---

(४२) पलाशैः पत्रैः मांसाशिभिश्च ॥

(४३) शिव बोधे कामान्तक इति पदं कामस्य अन्तकइति षष्ठी समासेन सिद्धं कामोन्त कोयस्य इति बहुव्रीहिणा समर्थयति ॥

बाणःप्रसूननिचयः स्वयमङ्गहीनो
लब्धं मनः स पुनरीश दूरंबिचित्रम् ॥४४॥

ज्ञातो मया गिरिश चन्द्रधरः पुरा त्वम्
भूषार्थमद्य मम निश्चय एष देव ।
कामे हतेऽस्तकरेण हि तस्य सख्या,
पादाहतः शिरसितेन तु चन्द्रमौलिः ॥४५॥

जानन्ति ये न परमार्थकथां गिरीश-
ते वै वदन्ति तव भालतले तु नेत्रम् ।
जानीमहे वयमहो स्मरबाणपात-
दुर्लम्भदारुणतरक्षतमेतदत्र ॥ ४६ ॥

नैवेन्द्रियस्य नियमेन पुराविदस्त्वाम्
हे चन्द्रखण्डधर योगिवरं वदन्ति ।
योगात् सदा दयितयैव पुनर्बिशङ्के
नो चेत् कथं बिहरसि त्वमरण्यमध्ये ॥४७॥

एवं वदन् कृशतनुर्विरहाधिमग्नो
बिज्ञाय तं शिवमुदाररसैकसिन्धुम् ।
तापैकहेतुमनिवार्यगतिं मनोजम्

ज्ञात्वा पुनर्वदति शुष्कतरौष्ठभागः ॥४८॥

केचिद्वदन्ति गरलं प्रखरस्वभावम्
केचिद्वदन्ति दहनं हननाय तीक्ष्णम्।
ब्रूमोवयं निखिलतत्त्वविवेकदृष्ट्या
काम त्वया सदृशवीर्यधरो न कश्चित् ॥४९॥

पुष्पं धनुः स्वयमपेततनुर्मधुस्ते,
मित्रं रयो हि पवनो मृदुमन्दगामी।
लक्ष्यं मनः प्रचपलं नहि भेदयोग्यम्
व्यस्तंसमस्तमिहयत्तदतीवचित्रम् ॥ ५० ॥

यो दर्पितोऽस्ति नवयौवनराज्यभोगात्
तत्रैव गच्छ बलवान् यदिकामदेव।
बालावियोगदहनैः परिदग्धकाये
दीने जने विफलमात्मशरप्रपातः ॥ ५१ ॥

कं वा वदामि खलु कः शृणुयान्महात्मा,
कृत्वा कृपामहह दीनजनस्य वाचम्।
आयातमेतमटविच्छविदर्शनार्थम्
हाहाकथंदहतितीक्ष्णतरःस्मरोऽसौ ॥५२॥

ये राजसूयप्रमुखैश्च मखैः प्रसिद्धा
जीवन्ति ते न निहतास्तु युधिष्ठिराद्याः ।
आजन्मसाधितवधूयुवद्वन्दघात
स्त्वं केन जीवसि पुनस्तपसा न जाने ॥५३॥

दुर्वृत्तवृन्द दमनाय पुरा पुराणो
देवस्त्रिलोकदयितो बहुधावतीर्णः ।
हत्वा दशास्यमुखदुर्जयदस्युसङ्घम्
त्वां जीवयन्किमुचकारपुनर्नजाने ॥ ५४ ॥

पापं क्षयाय जगतां सुकृतं जयाय
यद्गीयते तदिह मूढजनस्य वाक्यम् ।
नो चेत् कथं विविधपापचयैकपात्रम्
त्वं वर्द्धसे प्रतिदिनं स्मर सर्वदाहिन् ॥ ५५ ॥

न त्वं विषं न दहनो नतु कण्टको वा
शस्त्रं न मन्मथ बत स्वयमङ्गहीनः
सर्वात्मकोऽसि च पुनर्यत एक एव
तत्सर्वसाधितकृतिं निखिलां करोषि ॥५६॥

शक्तिर्मनोज कियतीति न वक्तु मीशा
ब्रह्मादयोऽपि विबुधाः क्व वयं मनुष्याः ।
प्राणः समस्तजगतां सुमनःप्रधानम्
श्रेष्ठो द्विजस्य तव सङ्गवशान्निकृष्टः ॥५७॥

एवं वदन् विरहसागरमग्नचेता
मूर्च्छन् क्षणं च निपतन् क्षणमुद्गताङ्गः ।
श्वासं जहत् कथमसुहृदयाधिवासा
मालम्ब्य चन्द्रवदनां वदतीत्यमेव ॥ ५८ ॥

हाहा सुधांशुवदने हृदयाधिवासे
प्राणप्रिये सरलहृन्मयि दत्तजीवे ।
दासं विनाद्य किमु जीवसि वा नवेति
संस्मृत्य चेतसि पुनर्न लभेय धैर्यम् ॥ ५६ ॥

त्वामन्तरेण शरदिन्दुनिभानने मे
यादृग्दशा भवति संप्रति तां नचान्यः ।
जानाति केवलमिमां रजनी दिवा च
साक्षीसमस्तविषयस्य हृदिस्थ आत्मा ॥६०॥

याचादिने निकटवर्तिनि जीवितेशे,

भीत्या ह्रिया गुरुजनस्य गृहस्य कर्म ।
हा कुर्वती त्विकलहृत् सततान्यचेता
मामन्तरेण नहिकंकुरुतेगृहस्थम् ॥ ६१ ॥
नाथ त्वमेव मम सर्वधनं नचान्यत्,
याचे न याहि विजहत् सुरतावसाने ।
सप्रेम कातरगिरेति मुहुर्वदन्ती,
विस्मर्यसे न पुनरेवमया कथंचित् ॥ ६२ ॥
गत्वा पुनस्त्वरितमेमि ममेति वाचम्,
श्रुत्वा गुरोः सदसि कातरमीक्षयन्त्याः ।
मालिन्यमाननविधोरिममन्तरेण
वश्यं करोति न पुनर्बत चेतनं कम् ॥ ६३ ॥
धाता विधास्यति कदा समयं ममैवम्,
जाने न चन्द्रवदने तव तत् प्रसन्नम् ।
द्रक्ष्यामि चारुवदनं प्रणयां कलोक्तिम्,
संसारसाररमणीयतनुं स्पृशेयम् ॥ ६४ ॥
यन्मे प्रिये त्वयि पुरा हृदि संस्थितायाम्,
जातो युगान्तरसमः पलकप्रपातः ।

सोऽहं सुदारुणविशेषघटनावशेन,
वर्षान्तरेऽपिसुखमीक्षितुमक्षमोऽस्मि ॥६५॥

श्रेयान् प्रिये प्रणयतो विरहस्त्वदीयः,
शङ्के सुधांशुवदने यत एव पूर्वम्।
मुग्धं चकार तव सङ्गवशात् प्रियत्वम्,
त्वामद्य नित्यमवलोकयते बियोगः ॥६६॥

श्रुत्वा पुराणकविकर्म वियोगिपक्षे,
ज्ञातास्त एव बहुशो बिफला प्रलापाः॥
जानेऽधुना बिरहदारुणवह्निलेश-
व्यक्तौ समस्तकरयो बलवत्प्रमोहाः ॥६७॥

धन्यस्त्वमेव विरहानलतीक्ष्णतेजा
नास्तेऽपरस्त्वदुपमस्त्रिषु विष्टपेषु।
स्पृष्टो न वा न खलु दृष्टतमो न मूर्तौ,
ज्ञातो जगद्दहसि तत्क्षणमेवसर्वम्॥६८॥

लज्जावशाद्गुरुजनस्य गतावशक्ते,
मत्प्रेमकर्षितभवच्चलचित्तवृत्ते।
शय्यास्थितोऽस्थिरतनुः सततोद्धकर्णो,

प्रतीच्छे॥ ६९ ॥

हा हा पुनस्तव कदागमनं प्रतीच्छे॥ ६९ ॥

रत्युत्सवं जनयता ददतातिशर्म्म,
वीणादिवादमवसादयता सुवक्त्रे ।
संचाररञ्जितदिशा भविता कदैष,
दासस्तवाङ्घ्रिवलयध्वनिना कृतार्थः ॥७०॥

निद्रां गतोऽसि किमु नाथ निशेयमल्पा,
प्रोच्येति मन्दहसितेन तनुं स्पृशन्ती ।
स्पर्शेन निन्दितसुधाकमलाम्बुनाशे,
पार्श्वस्थिता तु मुखयिष्यसि मां कदा त्वम् ७१॥

वर्षापयोधरगभीररवं निशम्य,
प्रोद्यन्मनोजशरपीडितकाययष्टे ।
भीतिच्छलेन सहसा निजबाहुपाशे-
रालिङ्गितं प्रियतमेनहि विस्मरामि ॥ ७२ ॥

हा हा कदा प्रियतमे सुरतान्तघर्म-
नाशाय पार्वणशरन्मृगलाञ्छनस्य ।
शीतागवाक्षपतिता विशदा मयूखा
योग्या भवन्ति हतभाग्यजनस्य पक्षे ॥७३॥

तीक्ष्णानिलेन हिमराशिवहेन तन्वि,
भूत्वा कदा सुनयने घनकम्पिताङ्गी।
गाढानुलिङ्गनकरी कुटिलाङ्गयष्ट्या,
संतोषयिष्यसि सुधांशुमुखि स्वदासम् ॥७४॥

किं किं सखे त्यज रदच्छदकम्पनेन,
संभाष्य सीत्कृतिसमुल्लसिताननेन।
शीतव्रणव्यथितमोष्ठयुगं प्रचुम्ब्य,
दासो भविष्यति कदैष पुनः कृतार्थः ॥७५॥

बालातपारुणरुचा वसनेन युक्ता,
ताम्बूलरागपरिरञ्जितचारुवक्त्रा।
पुष्पस्रजा ग्रथितकेशकलापमूला,
साक्षादनङ्गरमणीव कदैष्यसि त्वम् ॥ ७६ ॥

यत्नं विनापि पुनरेव कदा त्वदीया-
मापादमस्तकमयीं सुषमां सुवक्त्रे।
दृष्ट्वा चिरन्तनमिमं नयनीयतापं
शान्तं करोमि वनघर्मनिपीड़िताङ्गि ॥७७॥

किंवा सुधांशुवदने निखिला समेत-

द्राक्षालताम्बरप्रसूनकरो भवित्री ।
दीनां मदेकहृदयां यत एव हित्वा,
किंचित्करद्रविणवासनयाभ्रमामि ॥ ७८ ॥

साक्षात्कृतिस्तव पुनर्विरला विशङ्के
तां चेद्विधास्यति विचित्रकरो विधाता ।
याचेऽहमेतदधुना न पुनर्ममैष,
उक्तेति दातुमुचिता सरले त्रपा मे ॥ ७९ ॥

किंवा प्रिये मरणमाप्स्यसि मां विना त्वम्,
प्रार्थ्यं त्वयैव सतिधर्मसमीप एतत् ।
स्वीयैर्गुणैः सुमुखि येन पुनस्त्वदुक्तम्,
श्रोतव्यमल्पसुकृतेन मया भवेन्न ॥ ८० ॥

प्राणाः प्रयान्तु नहि तेन ममास्ति दुःख-
मिष्टं तदेव मम यद् विदशात् त्वदीयात् ।
हाहा हतस्तदभिमानवचस्त्वदीयं
कस्मिन्समाप्स्यतिसतीतिपुनर्विचिन्त्य ८१

प्राणा हि मे वनविपत्पतितस्य यान्ति,
एकं चिराय भवति स्थिर आत्मनोऽह ।

द्रक्ष्यामि ते मुखविधोर्विरहान्तरूपं
तन्नोचितं विषममेतदवार्य्यदुःखम् ॥ ८२ ॥
उत्तेजिता गुरुजनेन नितान्तघोरे,
कस्मै वदिष्यति कृशाङ्गिमनोऽभिमानम् ।
आकर्ण्य तत् प्रियगिरा परिचुम्ब्य वक्त्रं
को वातदैव द्रवयिष्यतिदुःखजातम् ॥ ८३ ॥
सेयं लता कुसुमिता स हि शीतरश्मिः,
सोऽसौ सुगन्धपवनो मृदुमन्दगामी ।
त्वामन्तरेण शरदिन्दु निभाननेहा
चेडं वमत्यविरतं दृशयोर्ममाद्य ॥ ८४ ॥
केनैव ते प्रियतमेऽजनि कायमेतद्
जाने न येन बतसङ्गवशेन यस्य ।
तीक्ष्णं विषं विकिरतां द्विषताममीषां
सङ्गः सुधामय इव प्रतिबोधितो मे ॥ ८५ ॥
हाहा प्रिये वहिरपे हि हृदो मदीया-
दस्मिन्न वस्तुमुचितं तव हन्त किञ्चित् ।
आशावलम्बनकरीह परं त्वमद्य

दग्धासि चेद्दुदनलेन हतो हतोऽस्मि॥८६॥
सोढुं न चैतमनलं तव कोमलाङ्गि,
शक्तिर्विलोकय बहिः परिवर्तमानाः।
तस्मा मदङ्गदहनस्य तु सङ्गभाजः
शीतालपल्लवप्रसूनसमीरणाद्याः॥ ८७ ॥
त्यक्तुं समर्थहृदयस्य भवत्कटाक्षं
प्राणेश्वरि प्रणयरत्नकृतात्महारे।
भिल्लीरवत्खरकठोरकृतेर्ममापि,
दुःसह्य एष विरहानलतापक्लेशः॥ ८८ ॥
नास्ते त्रिशूलिसमवीर्य्यधरस्त्रिलोके,
पीत्वा हि जीवति विषं य इदं वदन्ति।
मूढास्त एव न पुनर्मम तुल्यतेजा
आस्तेऽपरस्तव वियोगसहो हतो न॥८९॥
एवं विलप्य पथिको धरणीशयानो
मूर्छान्वितोऽथ मृदुमारुतलब्धसंज्ञः।
दृष्ट्वा समीपगतकाननसौम्यशोभां
दग्धो वियोगदहनैः पुनरेव वक्ति॥ ९० ॥

ये पक्षिणः परभृता वितरन्तु दुःखम्
ते सन्ततं भवति तेन न मे तिचित्रम् ।
संचारिणोऽपि अलयः क्षततोक्षणारावाः
कुर्वन्तु खण्डनमहो हृदयस्य नित्यं ॥ ६१ ॥

दोषाकरो दहतु मां विषसोदरोऽसौ
हन्ताशुगो भवतु वह्नि सखस्तथैव ।
पुष्पाणि वः समुचितं ननु ताप दत्वं
यद्वोजगत् सुप्रथितं सुमनस्त्वमस्ति ॥ ६२ ॥

अभ्यागताश्रयगपांथनिकृंतनाय,
दुर्वृत्तवन्यनिचयस्यचरक्षणाय ।
यत्नार्चनोपकृतिदानफलेननित्यम्,
किं श्रीफलेनबहुनायुतमस्यरण्य ॥ ६३ ॥

---

(६१) परभृताः पक्षिणः कोकिलाःपक्षे परः शत्रुभिः भृता धृताःपक्षिणो वा णा इति संचारिणो गमन कारिणः अलयः भ्रमराः पक्षे वाणा इति ॥

(६२) दोषाकरस्य द्रमाः सहि सागरजन्मत्वात् विष सोदरः पक्षे दोषाणां आकरःजन्म भूमिरिति आशुगः पवनः पक्षेवाणइति सुमनस्त्वं पुष्पत्वं पक्षे पण्डितत्वमिति ॥

शंकेत दद्य परमार्थ पथैकपांथा,
नारायणांघ्रिनलिनालयचित्तभृंगाः ।
कारुण्यशांतिदमधैर्य्य गुणैकवासा,
स्तत्श्रीफलंजहतिनूनमनर्थमूलम् ॥ ९४ ॥
चेत्श्रीफलेनकवलीकृतसर्वसत्वम्,
त्वं दस्युराजमितिलोकविनिश्चयार्थम् ।
नापेक्ष्यतेचविषयेपरएवसाक्षी,
रक्ष्यात्वयास्वभवनेयमदूतिकाली ॥ ९५ ॥
एकेनसर्वजगतामभितापकेन,
दग्धंजगद्भवतियेनतुमन्मथेन ।
ते मन्मथास्तुवहवोयदभीष्टदासा,
स्तत्त्वंशिवाययदिकोभविताकृतांतः ॥ ९६ ॥

---

(९३) श्री फलं श्रिया लक्ष्म्याः फलं सम्पत्तिः पक्षे श्री फलः मालूर वृक्षः ॥

(९४) नारायण पूजायां मालूर पत्रस्या प्रशस्त त्वादयं श्लेषः ॥

(९५) यमदूतिकालिः यमस्य दूतिकासमूहः पक्षे तिन्तिडो वृक्षः ॥

(९६) मन्मथः कामः पक्षे कपित्थ वृक्षः ॥

सभ्यस्तवायं जगदाधिकारी,
धात्राकृतः पूर्वमरिष्टनामा ।
नीतस्त्वयाति प्रियताविधानात्,
ससर्वतोभद्रसमाह्वयंकिम् ॥ ९७ ॥
शंके विधिस्तेद्य निदेशवर्त्ती,
कालक्रमाद्येनतवाश्रितोयम् ।
नाशाययः कंटककीर्णकायः,
कृतःसतेनाति महान् स्थिरायुः ॥ ९८ ॥
सदैक सेव्यापररागदात्री,
गायत्र्यसौत्वंततवाश्रिताद्य ।
नाशाय लोकस्य ततोविशंके,
कलेः क्षमत्वंनिखिलाद्विचित्रम् ॥ ९९ ॥
कोलोकनाम्नांपुनरद्यकर्त्ता,

(९७) अरिष्टः शत्रुः सर्वतोभद्रः सर्वत्र क्षेमकरः पक्षेद्वयमेव निम्ब वृक्षस्यनाम ॥

(९८) स्थिरायुः चिरजीवी पक्षे शाल्मलीतरुः ॥

(९९) गायत्री वेदमाता पररागदात्री परस्मिन् सर्वोत्कृष्टे परमेश्वरे रागः भक्तिः तस्यदात्री नामदानकर्त्री पक्षे पररागः महान् रक्तिमा गायत्री खदिर वृक्षः ॥

ज्ञानेन विज्ञान विलोचनोऽस्ति ।
तवाश्रितोयोजगदेकहंता,
शमीसयेनाद्य शिवाह्वयश्च ॥ १०० ॥
यएवते पार्श्वचरःशरीरे,
पांथस्यशीर्षाणि सकुंतलानि ।
विभर्त्ति नित्यं कुसुमच्छलेन,
ख्यातः सनाम्नाप्रियकोजगत्सु ॥ १०१ ॥
छायाश्रयंपांथ चयायदत्वा,
ज्ञातुंतदीयार्थ चयं किमद्य ।
सखातवासावतिपुष्टकायः,
किमापबोधिद्रुमनामधेयम् ॥ १०२ ॥
नास्तेऽपरोस्मिंस्तवतुल्यतेजा,
दस्युर्जगत्सु ध्रुवमाशुकारी ॥
क्रूरैर्वलिष्ठैः सहितं सहायैः,

---

(१००) शमीशान्ति विशिष्टः शिवाङ्कयः मंगलकरनामा पक्षे शमी शिवेति द्वयं शमीवृक्षस्यनाम ॥
(१०१) प्रियकः प्रियःबंधुःपक्षे प्रियकः कदम्ब वृक्षः ॥
(१०२) बोधो बोधवान्बोधिद्रुमः अश्वत्थ वृक्षः ॥

स्वयंप्रदीप्तंवहुपादु पेतम् ॥ १०३ ॥

ये नैवदीनावयमाधिलीना,
भूत्वा शरण्याः शरण प्रपन्नाः ।
प्राणै स्तुताः स्वःक्षणमोक्षणेन,
तत्ते ऽद्य किं कोषफलित्वमेतत् ॥ १०४ ॥

नकेवलंवीर्यसहायिहिंस्रं,
यथायथेच्छेत तथातथात्वम् ।
नोचेत्कथंलोचनलोभनीया,
रक्ष्यावयःस्याश्चयकूटजाश्च ॥ १०५ ॥

हा ब्राह्मणीयंकृतवेशभूषा,
सरोहिणी हन्ततथैवदेवी ।
अनागता पांय विनाश हेतो,

---

(१०३) बहूनि चरणानि पक्षे वज्रपात् वटवृक्षः ॥

(१०४) कोषोधनागारः फलित्वं फलं पक्षे कोषफलित्वं कोषफलः कक्कोल वृक्षः ॥

(१०५) वयः स्याः युवतयः कूटजाः कूटाय छलायजाताः छलकारिणः पक्षे वयः स्याः वयडा कूटजाः कुर्चि ॥

वीर्येण तेतेन हतोहतोऽस्मि ॥ १०६ ॥

द्विजाश्चमत्यास्तवदस्युहत्ते:,

सिद्ध्यैतदाहंकिमुवावदामि।

अथैककालेनजगद्विलुप्तम्,

कालोक्षयोदाख्यकरस्तवाद्य ॥ १०७ ॥

नमामिनित्यंतमहंवरेण्य,

मेषांपुनर्यस्तुचकारनाम।

कालानुसारीतितथाविदारी,

व्याघ्रीतिचैवाग्निशिखेतिहन्त ॥ १०८ ॥

कृत्वा सहायीं पिशुनांसदाया,

निहन्ति पांथांस्तु तपस्विनीसा।

अयोग्यकार्यं यदिदं विनाशि,

---

(१०६) ब्राह्मणी ब्राह्मण पत्नी रोहिणी नक्षत्र विशेषः देवी स्वर्गीया स्त्री पक्षे सर्वा वृक्ष विशेषाः ॥

(१०७) द्विजा ब्राह्मणादयः पक्षे द्विजेति वृक्ष विशेषः कालःयमः पक्षे कालेति वृक्ष विशेषः ॥

(१०८) कालानुसारी यमानुगतः विदारी विदारणकर्त्री व्याघ्रीतिस्पष्टं अग्निशिखा वह्निशिखा पक्षे सर्वा वृक्ष विशेषाः ॥

तन्नाम तोभोः परिपेलवंकिम् ॥ १०९ ॥
यथासरं पुण्यजनेतिनाम,
तथास्यकिं शीतल नामधेयम् ।
अथोग्रकार्येषु महाप्रवीणा,
किं चक्रवर्त्तिन्यतएवचैषा ॥ ११० ॥
दृष्ट्वैव पांथस्यशिरोनिकृत्य,
पीत्वातदीयं रुधिरं रसालाः ।
जानेर्नाकिन्ते कुरुतौ सहाया,
एतल्लभन्ते सहकार संज्ञाम् ॥ १११ ॥
ज्ञातोमयासौनतुजम्बूवृक्ष,
स्त्वद्विस्तृतंदारुणजालयंत्रम् ।
धत्तु कृत्वात्पांथमृगांस्तदद्य,

(१०९) पिशुना निष्ठुरा तपस्विनी तपः करणशीला पक्षे द्वयं वृक्ष विशेषः परि पेलवं अति कोमलं पक्षे वृक्ष विशेषः ॥

(११०) शीतलः शीतगुणविशिष्टः पक्षे वृक्षविशेषः चक्रवर्त्तिनी श्रेष्टा पक्षे वृक्षविशेषः ॥

(१११) रसालाः रसविशिष्टा सहकारः सहायः पक्षेद्वयमव आम्र वृक्षः ॥

मपि लब्धबोधे ॥ ११२ ॥

किंकर्त्तुमीशं

शंकेऽहमेषापथिकाश्रुधारा,

नदीकदाख्यान्नहि कर्मनाशा ।

तिष्ठन्तिगंगाप्रमुखाः समस्ता ।

स्तासांपुनः केदृशनामधेया ॥ ११३ ॥

अधुनापिमहापाप

दस्युर्वृत्तिर्विसृज्यतां ।

आगच्छति महाराजः

सविधेकिं नबुध्यते ॥ ११४ ॥

पताकादृश्यन्ते शवलवसनाःप्रोच्छ्रिततमा,

स्तथाशस्त्रग्रामानिशिततरधाराःखरतराः ।

निशम्यन्तेह्रेषाहयनिचयरोषातिकठिना

स्तथामातंङ्गानामतिगुरुतराडृंहितरवाः ॥

मृगोऽयंव्याघ्रोऽयंशमरुरयमृक्षोऽयमितिवा

---

(११२) जम्बूफलस्य जालगुटिका कारत्वात् तद्वृक्षस्यच विस्तारात् इयं शङ्का ॥

(११३) कर्मनाशा कर्माणि नाशायतीति अश्रुधारायाः अपवित्रत्वात् ॥

स्थितोऽयंयातोऽयंसततमितिकृत्वाकलकलं
द्रुतानांवन्यानांचरणरजसांराशिरुदितो
नभोध्वान्ताकीर्णंरचयतिरवौजाग्रतिसति॥

रोहन्तिशैलशिखरेचकितामयूरा
मज्जन्तिभूमिविवरेकुटिलाभुजङ्गाः।
चञ्चन्तिपल्लवचयाःपततिप्रसूनं
धावन्तिजन्तुनिचयाभयविह्वलाश्च॥१७॥

समुड्डीनाभीताःकलकलरवाच्छादितदिवः
पलायन्तेवेगाद्दिशिदिशिपतङ्गाश्चचकिताः
वराहाधावन्तित्वरितगतयःपल्वलजलात्
समुत्तीर्णामुस्ताङ्कुरनिचयकीर्णाटविपथाः॥

कृत्वाभूमीमभिनवतृणव्याप्ततांक्लिन्नवक्त्रो
वीरुच्छेदादसमगमनाज्जातपाशात्सभङ्गः
ग्रीवाभङ्ग्याविवृतवदनःशश्वदालोकमानो,
हित्वायूथंनिजसमदशंकृष्णसारःप्रयाति॥

यूथश्चंशाश्चकितनयनावेगविभ्रष्टसाराः
श्वासाकीर्णाहरिणशिशवोमन्दमन्दंप्रतान्ति

दग्धाघोरैर्जठरदहनैः कोटरव्यक्तवक्त्राः

कूजन्त्येते सकरुणरवं शावकाः पक्षिणश्च १२०

ज्वरक्लिष्टा भल्लाअपि गमनवेगानजहतः

पतन्तो मेदिन्यां प्रतिमुहुररण्यान्तरगुहां।

निमज्जन्ति क्लिष्टाः शशकनिचया वीरणतलं

तथा वेगात् शम्वश्चपलनयना लाविततदिशः १२१

कृत्वा गम्भीररावं खरतरनयनः पुच्छसन्ताडि

तोर्वि,

मूर्तक्रोधाग्नितुल्यः प्रविशति गहणं व्याघ्र एष

प्रचण्डः।

दृष्ट्वाजान् सन्ताड्य पादैः स्वनखरदशनैर्वानराव्य

ग्रचित्ता,

आलोड़न्त ऽतिभीतानिखिलवनभुवं चीत्क्ड

तिव्याप्तताशाः ॥ १२२ ॥

गर्ज्जन्तो महिषाः कठोरनयना उत्थाय पङ्का

न्तरात्,

धावन्ति द्रुतवेगकुट्टितधरा विभ्रस्यमर्त्यन्तरं

एकान्ते विकलत्वान्तरोऽतिचकितोदीनेक्षणः

कातर,

श्चीत् कारं कुरुते सदाचशमरु: स्थूलाङ्गभा
राकुल: ॥ १२३ ॥

एतद्भूपं स्थानम्
जानीत दस्यवो न यूयम्।
राजति काशिनरेश:
श्रीश्वरीप्रसादनारायणसिंह: ॥ १२४ ॥

वच:श्रुतेर्वाक्यमुपैतु दूरं
यदीयवक्त्राम्बुजदर्शनोत्थम्।
वक्तुं न शक्नोति सुखं त्रिलोकी
कदा स वो नावति तीक्ष्ण रूपान् ॥१२५॥

तमेव गत्वा कथयामि सद्यो
नासौ पुन: त्रन्तुमिदं समर्थ:।
दीनस्य तात: कुजनस्य हन्ता
पाता सतां यद्वसुधेश एष: ॥ १२६ ॥

नीतिशक्तिमवलोक्य यदीया-
मन्ववद् भृगुसुतस्य तु कार्यम्।

यद्बुधेन निरणायि ततोऽन्ध
ख्यात एष न पुनः फलतोऽन्धः ॥ १२७ ॥
यदीयतेजोविभवं विभावसुं
द्वयं समालोक्य बुधाः पतङ्गवत् ।
तमेतमन्तं विविदुर्यदन्तरं
पतङ्गनामा तरणिस्ततोऽजनि ॥ १२८ ॥
नासौसाधारणोज्ञेयोराजाकाशीश्वरःस्वयम्
यदि स्यादस्य कोपाग्निः क्षयूयंदृणवज्जगत् ॥
बाल्याज्जरावधि यदीययशो दिगन्ते
गायन्ति दोषभिजितां रिपवोऽपि यस्य ।
वार्त्तां वदन्ति न पुनः स तु किं मलाब्धौ
मग्नोभविष्यतिचिरंपरिरच्यमुष्मान् ॥१३०॥
सामान्यो न पुनर्धरापतिरयं धर्मः स्वयं मूर्तिमान्
किंब्रूमःकृतिमस्ययांकथयितुंशक्तोनधातास्वयम्।
यस्माज्ज्ञानहतानन्यगतिकानस्याश्रयेवासिनः
कृत्वादुःखहतान्ददातिजगतामुच्चैःपदंसर्वदा ॥
का कथा मानवानां तु अस्याश्रयनिवासिनाम्।

आब्रह्मस्तम्भपर्यन्तं श्रितमेतिपरं पदम्॥ १३२॥

पापारण्यनिवासिनो बलभृतो यूयं महातेजसो,
दीनोऽहंप्रकृशोऽस्मिचेन्नृपतिनात्यक्तुंनयोग्याः पुनः।
काशीनायकएषचास्यविमलेराज्येसमस्ताःसमा
काकोनिर्जरनायको नरपतिर्दीनोबुधोबालिशः
राज्ञो भयं न पुनरेय महाबलं वः
किञ्चित्त्व तिष्ठत महत् फलमस्य दास्ये।
उक्त्वेति काशिदयितं गदितुं स पान्थो
निर्याति विन्ध्यगिरिकाननभूमिभागात्॥१३४॥

॥ समाप्तं ॥

आस्वादयन्तुरसिका,स्वगुणरसक्रियास्वखिलास्व
साक्षात्प्रतीयमान,प्रतीपस्वरूपगर्भनिबन्धम्
रन्ध्रपूर्णांशुकवाजिचन्द्रविमितेख्यातेशकाब्देशुभे
वाशिष्ठान्वयजन्मनो द्विजनुषो वङ्गाश्रये वासिनः
श्रीकाशीशसभासुधाग्रपदवींप्राप्तस्यतर्कप्रिय
श्रीताराचरणस्यसाम्प्रतमियंनिष्ठांगता सत्कृतिः

B. L. 2417

15

537